हे अम्बिके हे देवि यानि ते तव करपल्लवसंगीनि खड्गशूलगदा-दीनि दिव्यान्यस्त्राणि सन्ति तैश्च त्वं सर्वत समन्ततः अस्मान् त्वद-नन्यत्रारणान् दैवान् रक्ष । दुःखतः पापतः शत्रुतश्च पालय ।

हस्तिशुण्डाशुवाहाय वलिषूक्तः कर पुमान् ।। करो हस्तः पाणि पञ्चशाखा शय. पाणिः अगुल्यः करशाखाः करपल्लवास्तै संगः तद्वन्ति । करपल्वसयुक्तानि । यद्वा । करः पल्लवइव करपल्लव तेन संगस्तद्वन्ति । करपल्लव संयुक्तानि । यद्वा करः पल्लव इव करपल्लव तेन संगस्तद्वन्ति । करपल्लवसगीनि हस्तस्थितानि । समन्तस्तु परितः सर्वतो विश्वगित्यपि । खड्गश्च शूलश्च गदा च खड्गशूलगदं सेनागत्वादेकवचनं । तत् आदिर्येषा तानि तथोक्तानि धनुरादीनि ॥

Closing

वैश्यवर्य त्वया यश्च वरोस्मत्तोभिवाञ्छितः ।
तं प्रयच्छामि ससिद्ध्यै तव ज्ञानं भविष्यति ॥

हे वैश्य हे वर्य यद्वा हे वैश्यवर्य वैश्येषु श्रेष्ठ. वयं त्वया अस्मत्त देवीत य. वरः अभिवाञ्छित. अस्ति । त वर ससिद्धयै परमात्म स्वरूपसगत्यै प्रयच्छामि ततश्च वरप्रदानत, तव ज्ञान भविष्यति । मोक्षे धीज्ञानमुच्यते । अस्मत्तः इति पञ्चमी वहुवचनस्य तसिल्-अतश्चैकत्वाभावात्प्रत्ययोत्तरपदयोश्चेति मादेशाभाव. । ननु च अस्मत्त इति वहुवचनोपक्रमात् प्रयच्छाम इति वहुवचनेन भवित-व्यम् । तत् कथं प्रयच्छामीत्येकवचनं स्यात् । एवं तर्हि अस्मत्त इति छेद । अस् क्षेपणे अस्य क्षितिपति ससार निराकरोति । अस् क्विपिरूपं परस्य विशेषण एकत्वात् मा देश. । अयस्मादित्वात् भावात् तुत्वाद्यभाव. । क्वचितु वैश्यवर्य त्वया मत्तो विरोधश्चाभि-वाञ्छित इत्येव पाठ. । यद्वा व्यत्ययोवहुलमिति एकवचनस्य वहुव-चनात् । ततश्च अस्मत्त इत्येव पाठः । वरणीयो वर्य क्लीवे प्रधान प्रमुखप्रवेकानुत्तमोत्तमा. । मुख्यवर्य वरेण्याश्च प्रवर्होनवारार्ध्यवत् । मार्कण्डेय उवाच ।। शनि स्वशिष्य वाचमुक्तवान् इतिदत्त्वा तयोर्देवी यथाभिलषित वरम् ।।..........

590/26690 गोविन्दाष्टक सटीक

Opening

श्रीपरमात्मने नम ।

श्रीमत्पूर्णार्थकृष्णस्य पादपङ्केरुहद्वयम् ।
प्रणम्य क्रियते टीका गोविन्दाष्टक गा इति ।।१।।

इह खलु सकललोकहितावतारो भगवान् महाविष्णु स्वयम्भु-वासुरारिचय वधायाभ्यर्थितो भूमौपरि जिहीर्षया यदुकुले किलावतीर्ण. सनकादिमुनिजनैरनुगीयमान' सच्चरितो नन्दवेश्मनि विजहार । तमेव विहारमष्टभि.श्लोकै सत्यमित्यादिभिरूपवर्णयन् भगवत्पूज्यपादमुनिर्निरस्तविशेष सच्चिदानन्दाद्वयं परमात्मपदमभि-ष्टौति । सत्यमिति ।

परमश्चासावानन्दश्चेतिपरमानन्दस्त निरतिशयानन्द गोभिगीर्भिस्तत्त्वमस्यादिमहावाक्यैर्विद्यते उपलभ्यत इति गोविन्दस्त

परमानन्दं प्रणमत प्रकर्षेण भक्तिश्रद्धातिशयेन नमतवाङ्मनः कार्यै-र्च्चयता किं अर्चनायां फलमित्याकांक्षायां परमेश्वरप्रसादेन सत्यज्ञानादिलक्षणपरमात्मप्राप्तिरेव मुख्यफलमित्यभिप्रेत्य तं विशिनष्टि। सत्यमित्यादिना, सत्यमवाध्य ज्ञानान्तरेण विषया-सत्वप्रतीतिः।

Closing

गोपालं प्रभुलीलाविग्रहगोपालं कुलगोपाल,
गोपीखेलनगोवर्धनधृतिलीलालालितगोपालम्।
गोभिर्निगदितगोविन्दस्फुटनामानं वहुनामानं,
गोधीगोचरदूरं प्रणमत गौविन्दपरमानन्दम् ॥४॥

अनंतो नाम तद्विद्धि वहुनाम सहस्रविष्णोः सुमतिं भजामह इत्यादिभिर्गोभिर्वेदैर्निगदित गोविन्देति, स्फुटं प्रसिद्ध नाम यस्य सगोभिर्निगदितं गोविन्दस्फुटनामान वहुनामानं। वहूनि असंख्या-तानि नामानि यस्य वहुनामान सर्वाण्येतानि नामानि परस्य व्रह्मणो हरे. इति परासरवचनात् असख्यातनामान वहुनामान-मित्यर्थ.। तर्हि नामरूपसम्बन्धादसंगत्वहानिरित्यत आह गोधी गोचरदूरमिति। यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह इति श्रुतेर्गोधियोरगोचरत्वादगोचराद्धिगोचराच्च दूरो निर्गुणे निष्कले परमानन्द चिद्रूपे परमात्मनि शब्दप्रवृत्तिनिमित्ताना जातिगुण क्रियादीनामसम्भवादवाङ्मनसागम्यमित्यर्थ, तदुक्तं षष्ठी जातिगुणक्रियादिरहिते सर्वस्य विज्ञातरि प्रत्यक्षे परिवर्जिताखिल-जगदद्वैतप्रपञ्च दृशासन्त्यक्तव्यवधानके विष्णोः पदे शाश्वतेत्यादि ॥४॥

603/27541 पराङ्कुशपञ्चविंशति

श्रीमते रामानुजाय नम।

Opening

श्रीपराकुशनुतिं नुति य आतनोत्तत्पदाब्जपरमभक्तिचोदितः।
त वाधूलकुलभूषण दयावारिधि वरददेशिक भजे।

श्रीमन्पराङ्कुशनिरकुशतत्त्ववोधवात्सल्यपूर्णकरुणापरिणाहरुपः ।
सौशील्यसागरमनन्तगुणाकरं त्वा ससारतापहरण शरण व्रजेहम् ॥

कासारसंयमिमुखाः कमलासहाय भक्ताः प्रपत्तिपदवीनियमामहान्तः ।
यस्याभवन्नवयवा इव पारतन्त्र्या तस्मै नमो वकुलभूषणदेशिकाय ॥

श्रीरङ्गराजपदपङ्कजसङ्गशील श्रेय परं मधुरपूर्वकवेरपूर्वम् ।
नाथार्ययामुनयतीश्वरभागधेयंनाथं कुलस्य मम नौमि परांकुशार्यं ।

पापक्रियासु निरताः श्रृणुतास्मदुक्ति तापत्रयेण भविनः परितप्यमानाः ।
आपद्धन मधुरिपोर्भवतामविद्या स्वापग्रहाणनिपुणः शरण शठारि ।

Closing

दैवात्वदीयणपथं दयया शठारे याहि प्रपन्नमिममुन्नतमदागस माम् ।
कार्याकृपासुमतिभिः खलु दुःखितेषु मया न मदृशो भृशदुःख भाजा ।

तस्मात्तवाखिलजनेषु च यानुकम्पा,
मय्येव तां शठरिपो निभृतं निधेहि ।

विश्वोपकारकमधार्णवतारकं त्वा-
मप्राप्य हे शठरि यो हत एव पूर्वम् ॥

अद्य त्वदीयकृपया प्रतिलब्ध सन्त-
स्त्वत्सेवनामृतरसेन सुखी भवानि ॥

अत्राप्यमुत्रकरणत्रित्रयप्रवृत्या,
त्वत्पादपकजजुषा विदुषा प्रसादम् ।
नित्यं लभेमहि न चान्यदपेक्षि,....
प्रत्यग्रकेसरपरिष्कृतकारिसूनो ॥

वाधूलवेंकटपतिं वरदार्यसूनु ।
मस्मद्गुरुं तव पदप्रवणं समीक्ष्य ।

अज्ञं कृतागसमनाथमकिञ्चनं मां,
त्वत्किंकरशठरिपो सततं कुरुष्व ॥

इति वरकुलधरं मुनिं वचोभिः,
श्रुतिसुखदेरधिकं प्रमोदयन्तम् ।
वरदगुरुवरं विचिन्त्य चेतो
मसममुपैति महत्तरं प्रमोदम् ॥

Colohpon ॥ इति श्रीपराकुशपञ्चविंशतिः सम्पूर्णा ॥

607/27851 **ब्रह्माष्टक**

Opening श्रीगणेशाय नमः ॥

अखण्डं चिदानन्ददेवाधिदेवं,
फणीन्द्रादिरुद्रादिइन्द्रादिसेव्यम् ।
सेव्य मुनीन्द्राकविद्रादिचन्द्रादिमित्रं,
नमस्ते नमस्ते नमस्ते पवित्रम् ॥१॥

धरात्वं जलाग्निमरुत्वं नभस्त्व,
घटत्व पटत्व अणुत्व महत्त्वम् ।
मनस्त्वं वचस्त्वं अगत्व दशत्वं,
नमस्ते नमस्ते नमस्ते समत्वम् ॥२॥

Clostng नरुष्ट नतुष्ट न इष्टं अनिष्ट,
न ज्येष्ठं कनिष्ठं नमिष्टं अमिष्टम् ।
न अग्रं न पृष्ठं न तुल्यं गरिष्टं,
नमस्ते नमस्ते नमस्ते अदृष्टम् ॥७॥

न वक्त्रं न घ्राणं न कर्णं न अक्षं,
न हस्तं न पाद न सीस न लक्षम् ।
कथ सुन्दर.......... सुघना मध्ययं,
नमस्ते नमस्ते नमस्ते प्रमेयम् ॥८॥

Colohpon ॥ इति श्रीब्रह्माष्टक स्तोत्रं सम्पूर्णम् ॥

640/27562 कूरनार्थविंशति

Opening

श्रीमते रामानुजाय नमः ।

श्रीरङ्गोज्वलमध्यवीतिनिलयं श्रीराममिश्रात्मजम्,
श्रीमहार्यपदाश्रय शुभगुण वाचा जयि भ्रातरम् ।
लोकार्थप्रवण तदुक्तिरसिकं सर्वज्ञभट्टारकं,
वन्दे तं भुवि विंशत व्यतनुत श्रीवत्सचिन्हस्य यः ॥१॥

श्रीरगराजकरुणामयदृष्टिवीक्षा,
सम्प्राप्तसर्वगुणराजिविराजमाने ।
श्रीमच्छठप्रमथने स्थिरभाववन्ध,
श्रीवत्सचिन्हगुरुमन्वहमाश्रयामः ॥२॥

श्रीयामुनार्यपदपङ्कजसक्तचित्तो,
श्रीमत्पराकुशगुरूत्तामलब्धविद्यो ।
श्रीलक्ष्मणे मुनिवरेर्पितसर्वभार,
श्रीवत्सचिन्हगुरुमन्वहमाश्रयामः ॥३॥

Closing

उक्तां सुभाषितसुधां च निशम्य नाथ,
त्वद्बन्धु नास्ति मम चेत्यभय चरामि ।
श्रीवत्सचिन्हभवताह्यभिभावितोह–
मित्यादरेण सततमपि रगनाथः ॥

आसन्नदीनजनरक्षणवद्धदीक्षः,
विज्ञापन त्विहमयोदितमुक्तिमात्रम् ।
सार्धं विचार्य सहसाद्य तवैव पूर्त्या
कूराधियोन्नमयमामिह सर्वथा त्वम् ॥

अर्वाञ्चो यत्पदसरसिजद्वन्द्वमाश्रित्यपूर्वे ।
मूर्ध्ना यस्यान्वय मुपगता देशिका मुक्तिमाप्ताः ॥

सोऽय रामानुजमुनिरपि स्वीयमुक्ति करस्थाम् ।
यत्सम्बन्धादमनुत कथं वर्ण्यते कूरनाथः ॥

Colophon ॥ इति कूरे (रेश) विंशतिः सम्पूर्णा ॥

651/27530 **गोविन्दराजप्रपत्ति**

Opening श्रीमते रामानुजाय नमः।

श्रीमन्निदानजगतां निखिलाण्डजात,
निर्वाहशक्तिमुखदिव्यगुणेकतान ।
अत्यन्तभोग्यनतदोषनिरस्तदोष,
गोविन्दराजचरणौ शरणं प्रपद्ये ॥१॥

नम्रीभवद् विधिशिवेन्द्रमुखादिते यः
चूडामणि प्रकरकान्तिकृताभिषेकौ ।
य........ महीकरतलाम्बुरुहार्च्यमानौ
गोविन्दराजचरणौ शरणं प्रपद्ये ॥२॥

Closing दुर्योधनेदुरभिमानिनीदुर्भराणा-
मग्रेसरे भजतिय; शिरसि प्रदेशम् ।
धन्येन यन्निकटस्थितमर्जुनेन,
गोविन्दराजचरणौ शरणं प्रपद्ये ॥

रारथ्यवेशसमलंकृतपाण्डुसूनुः
युद्धाङ्कणोज्वरथाञ्चलसन्निवेशौ ।
सान्द्रेन्द्रनीलपरिभावुकभव्यरूपौ
गोविन्दराजचरणौ शरणं प्रपद्ये ॥

Colophon श्रीमते रामनुजाय नमः। इति गोविन्दराजाप्रपत्तिः सम्पूर्णा. श्रीरामार्पणमस्तु ॥ श्रीराम ॥

662/27799 **दारिद्र्यभञ्जनस्तोत्र**

Opening श्रीगणेशाय नमः ।

ॐ कैलाशशिखरे रम्ये शम्भु चन्द्रार्द्धशेखरम् ।
प्रजाम्नायसमायुक्तं पपृच्छ नगकन्यका ॥

श्रीपार्वत्युवाच —
देवेश परमेशान सर्वशास्त्रार्थपारग ।
उपाय ऋणनाशार्थं कृपया वद साम्प्रतम् ॥२॥

श्रीमहादेव उवाच —
सम्यक् पृष्ट त्वया भद्र लोकाना हितकाम्यया ।
तदहं सम्प्रवक्ष्यामि सावधानावधारय ॥३॥

ॐ अस्य ऋणहरणस्तोत्रमन्त्रस्य सदाशिवऋषि अनुष्टुप्छन्द ।
श्री ऋणहरणगणपतिर्देवता ग्लौ वीज ग.शक्ति
गं कीलक ऋणनाशार्थे जपे विनियोग ।

ॐ गणेशऋण छिन्धि वरेण्यं हु फट् अथ ऋष्यादिन्यास:
ॐ सदाशिवऋषये नम: शिरसि अनुष्टुप्छन्दसे नमो मुखे

श्री कृष्णहरण गणपतये नमो हृदये ग्लौं वीजाय नमो ।
हृदय ग्लो वीजाय नमो गुह्ये ग शक्तये नम: ।

Closing

पञ्चाननाय फणिराज विभूषणाय,
हेमाम्वराय भुवनत्रयवन्दिताया ।
स्वर्गापवर्गफलदाय विभूतिदाय,
दारिद्रयदु खदलनाय नम. शिवाय ॥५॥

चर्माम्वराय चितिभस्मविलेपनाय
भालेक्षणाय मणिकुण्डलमण्डिताय ।
मम्जीरपादयुगलाय वृषध्वजाय,
दारिद्रयदु खदलनाय नम शिवाय ॥६॥

रामप्रियाय रघुनाथवरप्रदाय,
नारप्रियाय नगराजसुताप्रियाय,
पुण्योपपुण्यचरिताय सुरार्च्चिताय,
दारिद्रयदु खदलनाय नम. शिवाय ॥७॥

मुक्ताय यज्ञफलदाय गणेश्वराय
गीतप्रियाय वृषभेश्वरवाहनाय ।
मातङ्गचर्मवसनाय महेश्वराय,
दारिद्रयदु.खदलतायनम शिवाय ॥८॥

वशिष्ठेन कृतं स्तोत्रं सर्वरोगनिकृन्तनम्
सर्वकामप्रदं नृणां हत्याकोटि विनाशनम् ॥९॥

ब्रह्मघ्नश्च सुरापो वा स्त्रीहन्ता गुरुतल्पग· ।
शिवसायुज्यमाप्नोति य. पठेच्छिवसन्निधौ ॥१०॥

Colophon

इति श्री वशिष्ठकृतं दरिद्रविदीर्णस्तोत्रं सम्पूर्णम् ॥

677/27733 बाणलिंगस्तोत्र

Opening

जोगसारे पञ्चमपरिच्छेदे —
ब्राह्मे मुहूर्ते चोत्थाय य स्मरेत बाणलिङ्गकम् ।
सर्वत्रजयमाप्नोति सत्य सत्यं महेश्वरि ॥१॥

अथ बाणलिङ्गध्यानम् । तत्रैव—
ॐ प्रमत्त शक्तिसंयुक्तं बाणाक्ष्यञ्च महाप्रभुम् ।
कामबाणान्वित देवं संसारदहनक्षमम् ॥२॥

शृङगारादिरसोल्लासं बाणाक्ष्यं परमेश्वरम् ।
एव ध्यात्वा बाणलिंग यजेत्त परमं शिवम् ॥३॥

मनसा गन्धपुष्पाद्यै: संपूज्य य: मनुं स्मरेत् ।
तथा प्राणायामं ततो कृत्वा बाणलिङ्गं तु तोषयेत् ।
तद्दिष्टदेवयोरैक्यं विभाव्य वाक्भवं जपेत् ।
ततो जपं समाप्याथ स्तवेनानेन तोषयेत् ।
अथ स्तव —

Closing

ॐ बाणलिङ्गमहाभाग संसारात् त्राहि मां प्रभो: ।
किमन्यत् कथयामीह सर्ववेत्सि कुलेश्वर ।
महाभये समुत्पन्ने राजद्वारे कुलेश्वर ॥१५॥

देशान्तरे भये प्राप्ते दस्यु चौरादि सकुले ।
पठनात् स्तवराजस्य न भय लभते क्वचित् ॥१६॥

बाणलिङ्गस्य माहात्म्य सक्षेपात्कथितं मया ॥
तस्य स्मरणमात्रेण नरो मोक्षमवाप्नुयात् ॥१७॥

बाणलिङ्गस्सदाराध्यं योगिनां योगसाधने ।
कौलिकाना कुलाचारे पशूना शत्रु विग्रहे ॥१८॥

वेदज्ञानां वेदपाते रोगीनां रोगनाशने ।
यो यो नाराधयेद्देवं सर्वं तन्निष्फलं भवेत् ॥२०॥

Colophon: श्री इति श्रीयोगसारे सर्वाङ्गमुत्तमे पार्वतीशिवसम्वादे बाणलिगं स्तोत्र सम्पूर्णम् ॥

685/27553 **. मुकुन्दमाला**

Opening घुष्यते यत्र नगरे रग यात्रा दिने दिने,
तमह शिरसा वन्दे राजान कुलशेखरम् ।
जयतु जयतु देवो देवकीनन्दनोऽयम्,
जयतु जयतु कृष्णो वृष्णिवशप्रदीपः ॥

जयतु जयतु मेघ· श्यामल कोमलागो,
जयतु जयतु पृथ्वीभारनाशो मुकुन्दः ।

मुकुन्दमूर्ध्ना प्रणिपत्य याचे,
भवन्तमेकान्तमियं तमर्थम् ।
अविस्मृतिस्त्वच्चरणारविन्दे,
भवे भवे मेस्तु तवप्रसादात् ॥

नाह वन्दे तव चरणयोर्द्वन्द्वमद्वन्द्वहेतो
कुम्भीपाक कुरुमपि हरे नारक नापने तुम् ।
रम्या रामामृदुतनुलतानन्दने नाभिरन्तुम्
भावे भावे हृदयभवने भावयेय भवन्तम् ॥

Closing .

श्रीवल्लभेति वरदेति दय परेति,
भक्तप्रियेति भवलुण्ठनकोविदेति ।
नाथेति नागशमनेति जगन्निवासे-
त्यालापमाप्रतिपदं कुरु मे मुकुन्द ॥

मज्जन्मनः फलमिदं मधुकैटभारे,
मत्प्रार्थनीयमदनुग्रह एप एव ।
त्वद्भृत्यभृत्यपरिचारकभृत्यभृत्य,
भृत्यस्य भृत्य इति मा स्मर लोकनाथ ॥

ध्यायन्ति ये विष्णुमनन्तमव्ययम्,
हृत्पद्ममध्ये सततं व्यवस्थितम्-
समाश्रिताना सतताभयप्रदम्,
ते यान्तु सिद्धि परमा तु वैष्णवीम् ॥

यस्य प्रियौ श्रुतिधरौ नरलोकवीरौ,
मित्रे द्विजन्मनरपालसुतावभूताम् ।
तेनाम्बुजाक्षचरणाम्बुजषट्पदेन,
राज्ञा कृता कृतिरिय कुलशेखरेण ॥

Colophon

॥ इति मुकुन्दमाला सम्पूर्णा ॥

724/27469 कुलप्रदीप

Opening

॥ श्रीगणेशाय नम ॥ श्रीगुरवे नम ॥

गुरु प्रणम्य प्रथमं नतोऽह गणाधिप श्रीपरदेवताञ्च ।
मुदे महोपासककौलिकानां निबन्धमेकं रचयामि रम्यम् ॥

ग्रन्थेपु येष्वेषु सदाशिवेन सविस्तर श्रीकुलमार्गउक्त ।
प्राय कलौ ते सुलभा. न सन्ति ज्ञानञ्च तेषा परम दुरापम् ॥

गुरुकृपा यत्र भवेत्प्रसूना श्रीदेवतायाश्च महान् प्रसाद ।
तस्यैव पु सां कुलशास्त्रबोध. तस्यात्रभक्तिर्न खिलापनोद्या ॥

येषा दृढाभक्तिरिहास्ति शास्त्रे विन्दन्ति सम्यक् सकल रहस्यम् ।
प्राग्जन्मपुण्याद्विमलामनीषा ते निन्दका नाद्य भवन्ति लोका. ॥

भीता पशुभ्यो निजगोपनार्थं विन्दन्ति केचित्कुलशास्त्रमेतत् ।
केचित्तु निन्दानिरता अबोधा दौष्ट्येन ये ते निरयेन ……।।

साध्यस्य भक्ति सुदृढात्रशास्त्रे प्रवर्त्ततां स स्वशुभाय नूनम् ।
यस्यास्ति सा नैव सभिन्नशास्त्रे प्रवर्त्तता नन्दकतामुना हि ।।

Closing . दृशा द्राघीयस्या दरदलितनीलोत्पलरुचा,
दवीयास दीन स्नपय कृपया मामपि शिवे ।
अनेनाय धन्यो भवति न च ते हानिरियता-
वने वा हर्म्ये वा समकरनिपातो य हिमकर ।।

Colophon इति श्रीशिवानन्दाचार्यविरचिते कुलप्रदीपे सप्तम प्रकाश. ।।

Post-colophonic सवत् १६०४ लि०ची० गीरधारी श्रीगुरोश्चरणारविन्दप्रसादात् माघकृष्ण १३ गुरुवासरे शुभम् ।।

725/27794 कौतुकरत्नावली

Opening श्रीगणेशाय नम' । अथ कौतुकरत्नावली लिख्यते। पर्वतरत्नावलीत' चिकित्सा लिख्यते ।

सयोगादी …… तद्विविधशौर्यवता राज्ञा व्यसननिरसनकौतुकोपकारालोकनेनैव कालयापन कर्तव्यम् इति उक्तवन्त । प्राप्तावसराणि कौतुकानि सक्षेपतो निरूप्यन्ते । तान्येव कौतुकानि द्विविधानि । एका अर्थरूपाणि अपरा शब्दरूपाणि च । तत्र प्रथमार्थरूपाणि स्तम्भनवशीकरणवाजीकरणकृत्रिमवस्तुकरण जनादृश्यकरण वृक्षदोहदादि-भेदान्यनेकप्रकाराणि शब्दरूपाणि । द्वितीया तु शब्दालकृतगद्यपद्योभया-त्मककाव्यरूपाणि तत्रार्थलक्षण काव्याना पण्डितापण्डितस्य धारणेन कौतुकावहानि । विचित्रप्रबन्धप्रहेलिकाविभक्तादिविश्लेषैकतिचन प्रस्तूयन्ते । उभयप्रकारा नानाभय . .कौतुकावहलत्वाभावात् कौतुक-समानत्वमेव तव।र्दावर्थरूपाण्युच्यते । तत्र च कौतुकाप्रयोक्ता परकृत-प्रतिकूल सम्भावनाय।स्य शरीररक्षणपूर्वकमित्र कौतुकानि प्रयुञ्जीते तद्यथा ।

नासारन्ध्रद्वय लिह्वा गोघृतेन ततो मुखम् ।
क्षिपेत् वान्त्यफलौ स्तस्य, ... गौर्न हि वर्धते ॥१॥

तगराञ्जितनेत्रस्तु तगरेवाथ धूपितः ।
पूर्वस्ताच्चविधि कृत्वा पश्चात्कौतुकमाचरेत् ॥२॥

'विना रक्षाविधानेन यः करोति स दुष्यति' तथा प्रायशो हस्तलाध-वादिभूलेषु केशेपु केनचित् प्रयोगेषु प्रथमं प्रेक्ष्य क दृष्टिवन्धन कुर्वीत । तत्प्रकारस्तु प्रोच्यतेः—

Closing : तमालपत्राञ्जनपद्मचन्दन प्रियङ्गुभीरोचनया ममासके ।
कृताञ्जने नाञ्जितलोचन. पुमान् य वीक्ष्यते त कुरुते वश जनम् ॥

पुन·—

लाक्षया रञ्जितं वासो वहुशः सूकरासृजा ।
भावितं शोषयित्वाथ तेन कुर्व्वीत वर्तिकाम् ॥

सौवीराञ्जनशूकानि चूर्णगर्भांशुवर्तुलाम् ।
सूकरस्नेहभरिते दीपपात्रे निधाय ताम् ॥

प्रज्वाल्य कज्जलतस्मात् गृहीत्वा तेन यो नरः ।
अञ्जिताक्षो भवेत्तस्य सकलास्युर्वशास्त्रिय· ॥

पुन·—

स प्रियङ्गुवचाकुष्टं सूक्ष्मेलानागकेसरः ।
ससर्ज रससिद्धार्थो धूप. सर्वार्थसिद्धिदः ॥

पुनः—

जटामांसी पञ्चमलं नख कुन्दरुचिच्छुकैः,
लाक्षाकृष्णागरुस्पृक्वागन्धपत्रैस्समासकैः,
धूपसुगन्धनामारनाराचसन्निभः वशी-, (?)
करो त्रैलोक्यश्चमिति पूर्वैरुदाहृत. ॥ (?)

पुन.—

कर्पूरमधुभल्लातशुकसंलिप्तसाधना ।
रमते यानि हृदये ताश्चतिष्ठति सन्ततम् ॥

पुन —

वशीकरणम् ।
अगर तगर कुष्ट लज्जालुगिरिकर्णिका ।
शखपुष्पी अधोपुष्पी शिखामयूरदुग्धिका ।।
चन्दन कुङ्कुम चैव रोचन अस्मचम्पकम् ।

726/26718 महालक्ष्मीरत्नकोश

Opening :

भद्रकृत्या नमो देवि अङ्गिराऋषिरुच्यते ।
छन्दो गायत्रिमेव स्यात् भद्रकृत्या नमोस्तु ते ।।१।।

क्षं वीज ह्री तत· फट्कीलकमुदाहृतम् ।
खट् फट् जहि हृदिन्यस्य महाकृत्येति मूर्ध्नि च ।।२।।

विधूमाग्निसमप्रोक्ता शिखाया तु प्रविन्यसेत् ।
देवि देवि महादेवि कवचं यस्य तत्परम् ।।३।।

मम शत्रून्निति प्रोक्ता विनाशयतु नेत्रके ।
नमो नमश्च तेऽस्त्र स्यात् ततो ध्यायेन्महेश्वरीम् ।।४।।

कृष्णवर्णां वृहद्रूपा रक्तकुञ्चितमूर्द्धजाम् ।
शिरः कपालमालाञ्च विकेशीघूर्णिताननाम् ।।५।।

द्र ष्ट्राकरालवदनां नेत्रभ्रूकुटिलेक्षणाम् ।
रक्तनेत्रामतिक्रुद्धां लम्बजिह्वामधोमुखीम् ।।६।।

ऊर्ध्वदक्षिणहस्तेन विभ्राणाञ्च परस्वन्नम् ।
अधो दक्षिणहस्तेन बिभ्राणा शूलमूर्ध्वगम् ।।७।।

Closing

भूपुरं द्वन्द्वसंयुक्त तेषु मन्त्रं यथाक्रमम् ।
एतद्यन्त्र समालिख्य सिसेचासाध्यवृक्षके ।।
विपवृक्षेऽथ वा लिख्य रिपोर्गेहे तु दक्षिणे ।
खनित्वा तु पुन स्नात्वा सहस्र प्रजपेद्दच ।।
तद्दिनाद्रिपव सर्वे प्रयान्ति यमसाधनम् ।।

ॐ अज्ञास्ये० १ ॐ त्वमिन्द्रो० २ ॐ आवर्तध्वं०
ॐ त्वं यमं० ४ ॐ एते जह्यं० ५

एतासामपि पूर्वोक्त योग यन्त्रं च पार्वति,
कृत्या सूक्तेन सदृशो नैव लोकेति कश्चन ।
गोप्यानामपि गोप्यञ्च परकृत्याविनाशनं,
सर्वक्षुद्रहरश्रेष्ठ तव प्रत्यामयोदितम् ॥

Colophon

इति श्रीमहालक्ष्मीरत्नकोशे त्रिसप्ततितम. कुमारसहिताया अष्टादशोऽध्याय ।

Post Colophonic :

॥ श्रीशुभ भूयात् ॥

इति कार्तिक कृष्णा १२ गुरुवासरे तत्सवत् १९५८ लिपीकृत पांचूराम शर्मा आत्मार्थं पत्र संख्या २१ ॥

784/27463 गीतगोविन्द-भावबोधिनी-टीकासहित

Opening :

॥ श्रीगणेशाय नमः ॥

यत्सहितो गोपीनां हृदयाम्भोधौ सदा क्रीडा कुरुते ।
भवतरङ्गैर्जयति हरेरर्द्धमङ्ग सा ॥१॥

यद्रूपस्मरणाहितसस्कार कामिनीकान्त भजति ।
जितेन्द्रियताया. पदं हरि. सा सदा जयति ॥२॥

हरति हरेरपि चेतो यथा तथा नो हरिर्यस्या ।
न क्षणभेदसहिष्णु सा वृषभानो सुता जयति ॥३॥

भावतनौ भावात्मा स्थिता स्वभावेन भाविता सततं ।
श्रीवल्लभाभिधानेतद्रूपा वा सदा जयति ॥४॥

गुरुजनलालनपुत्रदम्पतिनवनवास्वादकेन्य एव स्वेष्टमिति ता एवैतत्प्रबन्धमङ्गलतया पद्मावतीरमणो जयदेवो वर्णयति मेघैरिति-कदाचिद्व्रजराजसदसि स्थित प्रियो महद्वृष्टिभवनभिया स्वगृहगमनायाज्ञप्तोऽपि यदा ह्रिया गन्तु न प्रवृत्तस्तदा व्रजराजे लाडलीपात सूचिवात्सल्यानुकूलपरिहासभङ्ग्या प्रियां प्रत्युक्तम् ।

Closing : यद्राधर्वेत्ति तत्त्वतः प्रेमस्वरूपव्यञ्जनकुशलस्यात' प्रियैकतत्परस्य जयदेवस्य यदज्ञानताननरङ्गेषु तद्भावसौन्दर्यं यच्च तद्ज्ञानज वैष्णव ध्यानं गौड्या सङ्केतित प्रतिक्षणतद्भावसौन्दर्ययुक्तसर्वत्र तदीक्षणं ततस्तज्जवाह्यदशाया रसराजविवेचनकाले तत्त्व तन्मयत्व साश्चर्यानन्दचेष्टित त ततस्तदृष्ट्वा सखीपठितेपु सैव जातेति प्रियाविवेकस्तुतिमयकाव्येषु सान्द्रलज्जाकोपचेष्टित तत्सर्वं हेस्वशिष्या वोधप्रमुदिताः सुधिय सख्य श्रिया निभृतेत्यादिगीतो नेत्रैकनिष्ठो यत्र तस्मात् प्रवन्धाद्वक्रकव्युद्भूततया यत्र यत्र भावो न सम्यग्वुद्धस्त त सन्देहग्लानिरहित कुर्वन्तु यतोऽस्य श्रवणात्त एव भावा पुनर्भविष्यन्तीत्यस्य प्रवन्धस्यैतदेव माहात्म्य हि ३०६

चञ्चलं हि मनो यस्य सेवनाद्धि रसायनम् ।
तद्वह्निशरणापत्तिरवश्या दीनचेतसाम् ।।१।।

वहि प्रकाश्यमालिन्य कूटे तस्य विनाशकम् ।
तापद्रवैकजनक वह्नि कर्मेन्धन भजे ।।

Colophon इति द्वादश सर्ग ।। १२-म १८७५ जेष्ट सुदि १ श्रीरस्तु श्री.
ग्रन्थ स २०७१

Post-colophonic महाराज श्री विरदसिहजी कृत लघुटीका
गीतगोविन्दाख्यस्य ।।

786/27709 गीतगोविन्द-साहित्यालङ्कारनाम्नीटीकायुत

(नास्ति प्रथम पत्रम्)

Opening : शृ गाररसप्रधान गीतगोविन्दाभिध प्रवन्ध विदधानोऽयं ग्रन्थ प्रतिपाद्य वस्तूपक्षिपन्नेव तन्निर्देशरूप मङ्गलमाचरति ।

मेघैर्मेदुरमम्वरं वनभुव. श्यामास्तमालद्रुमै-
र्नक्तं भीरुरयं त्वमेव तदिम राधे गृह प्रापय ।
इत्थ नन्दनिदेशतश्चलितयो प्रत्यध्वकुञ्जद्रु मं
राधामाधवयोर्जयन्ति यमुनाकूले रह. केलय. ।।

राधामाधवयोः राधाभिधानाया गोपिकाया माया लक्ष्म्या धवस्य भर्तुः कृष्णस्य च यमुनाया कालिन्द्या कूले तीरे प्रत्यग्रकुञ्जद्रुम प्रतिमार्गलतागृहवृक्ष रताः केलयः अभिसारसम्भोगक्रीडा जयन्ति उत्कर्षेणावर्त्तत इत्यर्थ. ।।

राधामाधवयोरिति प्रयुञ्जनिः न शृङ्गारिततयाऽन्येभ्यो हरेर्लीलावतारेभ्यो वामनादिभ्योऽनेकनायिकावर्जनचातुर्येण दाशरथिरामाद-प्यतिशयसूचयता न विप्रलम्भेन शृ गार. पुष्टिमर्हति । काषायिते हि वस्त्रादौ भूयान् रागोनुषज्यत इति नयानुरोधेन सपरिकरेर्ष्या मानानन्तर सम्भोगोऽत्र काव्ये प्राधान्येन प्रतिपाद्यत इति ध्वनितम् ।

यमुनाकूल इति । सैकतवेदिकाकन्दुकखेलनादिप्रसङ्गेन सञ्जातप्रथमावलोकनेनाङ्कुरितस्य वृन्दावनगवादिचारणलीलासमयवादितवेणुनिनादाकर्णनकौतुकस्य व्याजमन्दहसितव्यञ्जितभावानुबन्धद्वितीयदर्शनेन पल्लवितस्य कुमारिकाजनोचितगौरीव्रताचरणाङ्गमज्जनार्थं कलिन्दतनयावतरणसमसमयसमायातहृततीरस्थापिताम्बरकृष्णयाचनापदेशनर्मालापपूर्वं जलनिविडितवसनतया सर्वाङ्गीणलावण्य विलोकनेन कुसुमिततस्यानुरागस्यदुर्विषहविरहसन्तप्तया क्वचिदपि-स्थातुमशक्नुवत्यास्तीरकुञ्जकुसुमशयनमानीताया राधाया. क्वापि निर्वृत्तिमलभमानस्य प्रथमतदवलोकनादिसुभगप्रदेशदर्शनेनात्मान विनोदयितुमागतस्य च कृष्णस्य विदग्धसखीविरचितप्रथमसमागमफलस्यापि सम्वादकतया उभयोरपि कालिन्दीरोधस स्पृहणीयतमत्त्वम् ।।

Closing : अङ्घ्रिर्वेति किं वदामि सख्यादिपदशब्दश्रवणेऽपि त्वत्समीपागमन सम्भ्रमेणैकमेव वलयादिकरचरणादिषु पूर्ववत्त्वद्धारितत्वत्सन्निवेशाय-थातथास्मरणपूर्वं त्वन्नेत्रात्सवापादक विभर्ति तथा औत्सुक्येनापर्यवसितमण्डनैव यत्रापि मन्दमारुतवशेन किञ्चिच्चलिते त्वामेव समीपमागत मन्यते, तथा मन्यमानाशयनीय रचयन्तीत्वदागमनहर्षनिर्भरमानसा भवति तथा जायमाना त्वामपश्यन्ती निमीलितनयना कथमत्रागतोऽपि क्व निलीय स्थित. किं वा मया विपर्यस्तमितिविनम्रवदना चिन्तयतीति भाव. । एव सख्याराधा.... .. ...

800/27830 राक्षसाभिधानकाव्य–सटीक

Opening : ।। श्रीगणेशाय नम॰ ।।

कश्चिद्वन वहुवन विचरन्वयस्थो-
वश्या वनात्मवदना वनिता वनार्द्राम् ।
तर्वर्यरिप्रदयुदीक्ष्य समुत्थित खे,
नागामिमा मदकल सकला बभाषे ।।१।।

टीका–।।श्रीगणेशाय ।।

कश्चिदिति कश्चिदनिर्दिष्टनामा पुरुष , वहुवन बहुजल वन कानन विचरन् भ्रमन् सन्, खे नभसि उद्गत तरूणामरिर्योऽग्निस्तस्यारिर्जलं तत्प्रदं मेघ वीक्ष्य वन जलं आत्मा यस्य स चन्द्र. कमल वा तद्रुपतुल्यमुखी वनिता स्त्रियं स्वीयामिति शेष । इमा अग्रे वक्ष्यामाण सकलां समग्रा वाच वाभषे जगाद । कीदृशो ना वयस्थ तरुण: वयस्थस्तरुणो युवेत्यमर॰, पुन कीदृश मदेन हर्षेण मद्यजेन चित्तभ्रमेण विकल ज्ञानशून्य: व्याप्तश्च मधुरेतियावत् कीदृशी स्त्रिय वश्यास्वाधीनां सकलामिति स्त्रीविशेषणे चतु षष्ठिकलायुक्तां चातुर्येणैव युक्ता वा पुन. कीदृशी वनेन जलेन आर्द्रा उक्षिता अस्मिन् काव्ये वर्षावर्णन वसन्ततिलकावृत्तमिद स्वयोनिभक्षध्वेत्यन्त भ्रान्तैर्गान्तिलगैर्भवेत् ध्रुवमिद वृत्तं वसन्ताख्यकमितिलक्षणात् ।।

Closing : कालिदासकृत काव्य काठिन्याद्र क्षसभिवम् ।
पठित्वा मतिमन्दोऽपि पण्डितो भवति ध्रुवम् ।।२१।।

इति कालिदासकृतं काव्य समाप्तमगात् ।

टीका–।।फलितार्थमाह।।

कालिदासेति कालिदासेन कृत रचितमिद काव्य राक्षसाख्य यो नर. पठते समूर्खोऽपि पण्डितो भवतीत्यह मन्ये इति दिक् । इति नन्हूभट्टरचिता राक्षसाभिधानकाव्यस्य टीका समाप्ता ।।

Post-Colophonic : लीषतु ब्राह्मणगौडरावावल्लभ. की (कि) सनगढमध्ये मीति अचाश्विनशुक्लपक्षे १५ रविवासरे मध्याह्ने संवत् १६०७ ।।

808/27470 भर्तृहरिशतकसुखबोधिनीव्याख्यासहित

Opening : ।। श्रीगुरु. ।।

चूडोत्तंसितचारुचन्द्रकलिकाचञ्चच्छिखाभास्वरो,
लीलादग्धविलोलकामशलभ श्रेयो दशाग्रे स्फुरन् ।
अन्तस्फूर्ज्जदपारमोहतिमिरप्राग्भारमुच्छेदयन्,
चेत. सद्मनि योगिना विजयते ज्ञानप्रदीपो हर ।।१।।

।। श्रीगुरुः श्रीगणेशाय नम· ।।

ज्ञानप्रदीपोहरः श्रीमहादेवः ज्ञानरूप प्रदीप ज्ञानप्रदीप एवं ज्ञान-रूपदीपस्वरूप. शिवो योगिना चेत· सद्मनि चित्तगृहे विजयते विराजते कथ भूतो ज्ञानप्रदीपो हरः चूडात्तासितचारुचन्द्रकलिका चञ्चच्छिखाभास्वर चूडा नाम जटाजूटस्तस्मिन् उत्तासिता मुकुटरूपा या चारुचन्द्रकलिका मनोहरचन्द्रिकला सैव चञ्चच्छिखा देदीप्यमाना ज्वाला तया भास्वर दीप्यमान । पुन कीदृग् लीलादग्धविलोलकामशलभ लीलया क्रीडया दग्धो विलोलश्चपलः कामरूप शलभ पतङ्गो येन स पुन श्रेयो दृशा मोक्षदृशा मुक्तिवर्तिस्तस्या अग्रे स्फुरन् सन् अन्तस्पूर्ज्जदपारमोहतिमिरप्राग्भारमुच्छेदयन् अन्त ससारमध्ये स्फूर्जद् विलसत् अपारमोहतिमिरो मोहान्धकारस्तस्य प्राग्भारो विस्तारस्त उच्छेदयन् नाशयन् सन् एव भूतो हरो ज्ञानप्रदीपो योगिना चित्तगेहे विराजते ।

Closing : चला लक्ष्मीश्चला प्राणाश्चलं जीवितयौवनम् ।
चलाचले च ससारे धर्म एको हि निश्चल ।।१०७।।

Colophon : ।। श्रीमद्भर्तृहरिविरचितं वैराग्यशतक सम्पूर्णम् ।।

टीका—

लक्ष्मीश्चला प्राणा अपि चलाः पुनर्वित्तयौवनमपि जीवनेतारुण्यमपि चल एव भूते चलाचले ससारे एको धर्म एव निश्चलो वतते।१०८।

श्रीमत्पुष्करव्यासस्य श्रीनाथेन सूनुना,
वैराग्यशतकस्यास्य टीकेयं सुबोधिनी ।।
निर्मिता स्वात्मबोधाय यथार्थास्वादिनी मया,
विद्वद्भिर्मत्पर त्यक्त्वा शोधनीया प्रयत्नतः ।।

Post Colophonic : इति श्रीव्यासनाथेन व्यासपुष्करदासात्मजेन विरचिता भर्तृहरिकृतकाव्यटीका सुबोधिनी समाप्ता। श्रीगुरुजी चरणारविन्दप्रसादात् श्रीरस्तु कल्याणमस्तु श्री जी ॥

813/27824 शब्दबन्धकाव्य सटीक

Opening : ॥ श्रीगणेशाय नम. ॥

नानाननेननानेन नूनं नुन्ना निनोननु ।
नोनान्ननीनिनानैनो ननानिनु नना निनुः ॥१॥

तौतातितततातीति तं तु तेततिता तता ।
तातततत्ततताती तततोतितु ततातति ॥२॥

कैकाकिकं किकु केकिकेकाकाकुककाकके ।
काकैककेककौ कोककोककोककांकके ॥३॥

मायामायामयामायि यामयामेय मायया ।
यामेयामेमुयायाया मायामयमयीमये ॥४॥

Closing : मन्दारदामस्रदिमाभिरामा,
सन्दानदाकम्रतमानुरागे ।
मन्दावदाताम्रतमाधरा सा
मन्दाक्षदानम्रगमान्तरास्ति ॥१५॥

नायकोऽनुभूयमाह मन्दारेति । मन्दारपुष्पाणा दाम माल्यं तद्वन्मृदुत्वेन आभिरामा रम्या कम्रतमोऽतिकामुक 'कम्रः कामयिताभीक' इत्यमर.। तस्यानुरागे सन्दानं वन्दनं ददातीति सन्दानदा श्वेतरागविषयकन्वसम्पादिकेत्यर्थ.। मन्दावपात नवोद्भिन्न आम्र आम्रदल तदिवाधरो यस्याः रक्तत्वात्कोमलत्वाच्च मन्दाक्षद लज्जाज्ञापकं आनम्र गमान्तर विलक्षणं गमन यस्या. औद्धत्यविरहाद्गमनस्यानम्लत्वोदया ईदृशी सा नायकास्ति । अत्रैकपादविषमाक्षरोत्तरद्वितीयाद्यक्षरस्याद्वितीयादि पादाक्षरवाचने स एव पादो भवति एवमर्द्धद्वयस्योपर्य्यधो भावेऽपि ॥१५॥

817/27580 सभातरङ्गसार

Opening : ।। श्रीगणेशाय नम. ।।

नत्वा शिवं प्रथमत: प्रणिपत्य चण्डी,
वाग्देवतां तदनु तातपदं गुरूंश्च ।
संगृह्यते किमपि यत् सुजनास्तदत्र,
चेतो विधातु. मुदिता कृपणा मयि स्यु ।।१।।

जगन्नाथेन मिश्रेण तेनैव क्रियतेऽधुना ।
नाम्ना सभातरङ्गोऽय सग्रह. सत्सुखावह: ।।२।।

सारस्वते स्फुरतु चेतसि सत्कवीनां,
... भवन्तु कृतिनो गतमत्सराश्च ।
भूपाश्च सन्त. कविसूक्तिषु सानुरागा: ।
सन्त्यज्य भण्डकजनप्रणयानुरागा ।।३।।

अथ महता प्रशंसा:—

ददाति प्रतिगृह्णाति गुह्यमाख्याति जल्पति ।
भुङ्क्ते भोजयते चैव षड्विध प्रीतिलक्षणम् ।।४।।

प्रकाममभ्यस्य तु जातु विद्यां सौजन्यमभ्यासवशादलभ्यम् ।
कर्णौ सपत्न्य. प्रविसारयेयुर्नसारयेयुर्नयने कदाचित् ।।५।।

... ...

का विद्या कविता विनार्थिनिजने दानं विना श्रीश्च का
को धर्म कृपया विना, क्षितिपति. को नाम नीतिं विना ।
क: शिष्यो विनयं विना, कुलवधू का स्वामिभक्तिं विना ।।६।।

सौजन्यामृतसिन्धव: परहिते प्रारब्धवीरव्रता,
वाचाला: परवर्णने निजगुणालापे च मौनव्रता: ।
आपत्स्वप्यविलुप्तवीर्यनिचया: सम्पत्स्वनुत्सेकिनो,
माभूवन्खलुवक्त्रनिर्गतविषज्वालामहा. सज्जना: ।७।।

Closing : अथ रत्नान्योक्तय —

यस्य वज्रमणेर्भेदे भिद्यन्ते लोहसूचिका. ।
करोति तत्र किं नाम नारीनखविलेखनम् ॥१॥

सोमकान्तो मणि: स्वच्छः सूर्यकान्तमणिस्तथा ।
उद्गारे तु विशेषोस्ति तयोरमृतवह्निता ॥२॥

स्फाटिकस्य गुणो योऽसौ स एवायाति दोषताम् ।
धत्ते स्वच्छतयाच्छायां यतो मलवतामति ॥३॥

सुधाकरस्पर्द्धि वहिर्द्रवति सर्वतः ।
चन्द्रकान्तमणेस्तेन मृदुत्व लोकविश्रुतम् ॥४॥

भ्रष्ट नृपतिकिरीटाद् भूमौ पतितं तिरोहितं रजसा ।
विधिविलसितेन रत्नं जनचरणविडम्बनां सहते ॥५॥

आघ्रातं परिलीढमुद्रनखरैः क्षुण्णं स्वय चर्वितम्,
क्षिप्तु यद्वतनोः रसत्वकुपिते नेति व्ययां मा कृथाः ।
हे माणिक्य तवैतदेव कुशलं यद्वानरेणाग्रहा-
दन्त सत्त्वनिरूपणाय सहसा चूर्णीकृत नाश्मना ॥

Colophon : ॥ इति सभातरङ्गसारः ॥ ॥ नारायणाय नमः ॥

834/27984 पण्डितमुखमण्डन

Opening : ॥ श्रीगणेशाय नम ॥

भृङ्गिप्रस्तुतगीतिमञ्जिममिलत्तद्भल्लरीभङ्कृति,
स्फूर्यं(र्जं) ड्डिडिममञ्जुनादमुरजन्यस्तैकहस्तोत्पलम्
अङ्गत्रस्यद ·· माद्यनटनक्षिप्ताग्रपादाम्बुज,
प्रोद्यद्घर्घरिकाभरणत्कृतिदलद्ब्रह्माण्डमीश भजे । १॥

उद्घृत्य सर्वसार ग्रन्थानालोक्य सर्वश ।
सुमति. कोऽपि सुभाषितमेतत्पण्डितमुखमण्डन कुरुते ॥२॥

अथ दशावतारवर्णनम् । तत्रादौ मत्स्यावतारः ।

चन्द्रादित्योरुनेत्रः कठिनमलभवस्फारपृष्ठः प्रतिष्ठो,
भास्वन्कालाग्निजिह्वः पृथुलगलगुहाहष्टनिःशेषविश्वः ।
अद्भिः प्रच्छोच्छ्रिताभिश्शकितसुरवधूर्लोकससूचिताभिः,
मत्स्यः क्षीराब्धिवेलागगनतलमलक्षालयन् वः पुनातु ॥३॥

कूर्मः—

निःप्रत्यूहमनल्पकल्पचलितत्रैलोक्यरक्षागुरुः,
क्रीडाकूर्मकलेवरः स भगवान् दिव्यादमन्दा मुदम् ।
कल्पान्तोदधिमध्यमज्जनवशात्... संलुठन्,
पृष्ठे यस्य वभूव सैकतकणच्छायं धरित्रीतलम् ॥४॥

Closing :

उत्खात निधिशंकया दिव (क्षि) तितलं ध्यातागिरेर्ध्वान्तवो
निस्तीर्णस्सरितांपतिर्नपतयो यत्नेन सन्तोषिता. ।
मन्त्राराधनतत्परेण मनसा नीतश्मशाने निशा,
प्राप्तैकापि वराटिका न च मया तृष्णेऽधुना मुञ्च माम् ॥६६॥

आदित्यस्य गतागतैरहरह संवीक्ष्यते जीवनम्
व्यापारैर्बहुकर्मभारगुरुभिः कालो न विज्ञायते ।
दृष्ट्वा जन्मजराविपत्तिमरणं त्रासाश्च नोत्पद्यते
पीत्वामोहमयीप्रमादमदिरामुन्मत्तभूत जगत् ॥६०॥

मृद्वीका रसितासिता समसिता स्फीतं निपीत पय ,
स्वर्यातेन स्वधाप्यधाय कतिधाः रम्भाधरः खण्डित ।
सत्य व्रूहि मयी (दी) यजीव भविता भूयो भवे भ्राम्यताः
कृष्णेत्यक्षरयोरयं मधुरिमोद्‌गार. क्वचिल्लक्षितः ॥६८॥

रामाय नम. । कृष्णाय नमः ॥

888/27462 सिद्धान्तरत्नावली

Opening :

॥ श्रीइष्टदेवो जयति ॥

श्रीमद्विष्णुपदाब्जमञ्जुलिदल सद्ज्ञानकिञ्जल्कित,
पीयूपोन्मकरन्दमुद्यदसमा नाराजित स्वोद्यतम् ।

योगीशामरकिङ्कराणिनिवहै: पेपीयमानं मुदा
ज्ञानानन्दभरप्रदायि नितरां सच्चिन्तये संविदे ।।१।।

बुद्ध्वाध्वागुरुणा सनातनगुरुव्यक्तिस्य गाधार्णवात्
सत्सारस्वतनौश्रित सुमतिद श्रीपाणिनीयोत्सट ।
सोऽहसावु समुद्धरेत्सुमनसां सन्तोपयित्री सदा,
सत्कण्ठाभरणाय माधवसुधी सिद्धान्तरत्नावली ।।६।।

सारस्वत मत्यनुसारतस्तत्प्रक्षेप्य कालुष्यनिराशहेतो,
व्याख्यामह व्याकृतिमप्यनल्पैर्हास्यो नचास्या गुणग्रह्यसद्भि ।।७।।

तत्र सारस्वतीं प्रक्रियामृजु चिकीर्षु: श्रीमदनुभूतिस्वरूपाचार्यस्तदविघ्नसमाप्तिप्रचयगमनशिष्टाचारावनार्थमिष्टदेवपरमात्मप्रणति मंगलमाचरन्विषयप्रयोजनसम्बन्धाधिकारिणोऽपि सूचयन् प्रतिजानीते प्रणम्येत्यादिना श्लोकेन ।

Closing . प्रकारस्य स्त्रीभुवो रिस्फवद् भवति भ्रुवै भ्रुवै भ्रुवा भ्रुव: २ भ्रुणा भ्रुवां २ भ्रुवीति शेष सुगम वधूजवादीनामिति । एपा तु विशेषान्तराभावान्नित्यमटि नदीशब्दवत् रूपाणीज्ञेयानीत्यर्थ. ह्रेवब्वितिर्धा ह्रस्व इति ह्रस्वे घिलोप जस्येति ऋदन्तत्व साम्यात्सेरित्यादि प्रक्रियाऽस्य पितृशब्दवत् स्यादित्यर्थ: । नत्वाभाव इति पुस इत्युक्तत्वात्सो न पुंस । इत्यस्याप्रवृत्तेरितिशेष: ख ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ

(अन्तिम अश अप्राप्त)

926/27510 वृत्तरत्नाकर-ललिताक्षराटीकायुक्त

Opening ।। श्रीगणेशाय नम ।।

यत्पादाग्रनखांशुराजिररुणानम्रालिके राजते,
तत्कालागरुसम्पद: पदतति. सद्यावका काकिल ।
त नत्वा जलमङ्गलैकवसतिं सङ्कल्पकल्पद्रुम,
श्रीमत्पार्श्वजिनेश्वर मदगज मोहाङ्घ्रिपोन्मूलने ।।१।।

गुरो प्रसादादधिगम्य वृत्ति रत्नाकरश्छन्द स उद्यमेन ।
सार मया किञ्चिदथास्य वृत्तिर्विधीयते मुग्धप्रबोधहेतो. ।।२।।

मयाऽत्रशास्त्रान्तरदर्शनेन प्रोद्भूतमत्यार्थविशेपवोधात् ।
व्याख्यायते केवलमेव सूत्र पुरातनोदाहरणावलीत. ॥६॥

ग्रन्थारम्भे स्वीकृतशिष्टसमयप्रतिपालनातिभारो ग्रन्यकारो निखिलविघ्नाचलत्कुलिशाकारं अभिमतदेवतानमस्कार मुनिजनमनोवशीकरणधात्री आत्नोऽच्यनाम्नी प्रेक्षावत् प्रवृत्तिनिमित्तमयमभिधयादित्रयं श्लोकत्रयेण कमेण प्रतिपादयन्नाह । तत्रायमाद्यश्लोकः ।

सुखसन्तानसिद्धयर्थं नत्वा व्रह्माच्युतार्चितम् ।
गौरीविनायकीपेतं शङ्करं लोकशङ्करम् ॥

शङ्करं शिव नत्वा प्रणम्य किमर्थं सुखसन्ततिः प्रत्यूहानभ्य सामान्यशास्त्रादिनिर्माण समुत्पन्नानन्दसन्दोह सिद्धिः परम पद तदर्थम् ऐहिकपारत्रिकसौख्यनिमित्तमित्यर्थ. । तद्विशेषणैस्तत्सहिमानमाविः करोति यथा कथं भूतं शङ्कर व्रह्मेति व्रह्माविश्वकर्ता अच्युत. सनातन पुरुषो विष्णुस्तयोरर्च्चितः पूजितः सहितस्त तथा तत्सेव्यमित्यर्थ पुनः कथभूत लोकैकिलोकः सप्तभुवनात्मक तस्य श सौख्य करोतीति तथा विश्वविश्वप्रसाददानक्षममित्यर्थ अनेन च यो देवपूजितो देव. सेव्य सकललोकानुग्रह समर्थश्च भवति स एव नमस्कारमर्हतीत्युक्तम् ॥

Closing :

मद्वृत्तरत्नाकरनामधेयशास्त्रस्य वृत्तावधिकार एषः ।
प्रस्तारनष्टादिकवर्णनोऽत्र सोमोदितायामजनिष्ट षष्ट ॥

वादिश्रीदेवसूरेर्गुणगणनविधौ विभ्रत. शारदाया,
नामप्रत्यक्षपूर्वं सुजयमदसूतो मङ्ग ......
पादद्वन्द्वारविन्दे वुधमधुपयितेभृङ्गमङ्गि दधानो
वृत्ति सोमेऽभिरामामरुतकृतिमता वृत्तरत्नाकरस्य ॥

अन्यच्च —

प्रमाददौत्सुक्यात्कविक्वचिदनववोन्नेनयदि वा
ममैतस्या वृत्तौ सहृदयजनाः कोमलमते ।
अवन्ध्य चेत्किञ्चिद् भवति भवतामञ्जलिरियं,
प्रसाद कृत्वा तत्प्रगुणमतिभि. साध्यमखिलम् ॥

Colophon : इति सी (शि) त्रचन्द्रविरचिता वृत्तरत्नाकरस्य ललिताक्षरानाम्नी टीका सम्पूर्णता पकाण

931/27967 श्रुतबोधप्रबोधिनीटीकासहित

Opening :

मूल.—

छन्दसा लक्षण येन श्रुतमात्रेण बुध्यते ।
तमह सम्प्रवक्ष्यामि श्रुतबोधमविस्तरम् ॥१॥

टीका:—

॥ श्रीराधाकृष्णाभ्या नमः ॥

नत्वा गुरुपदद्वन्द्वं बालाना सुखवृद्धये ।
क्रियते वासुदेवेन श्रुतबोधप्रबोधिनीम् ॥१॥

श्रोतृजनप्रवृत्तये स्वचिकीर्षितग्रन्थ नाम यथार्थ निबध्नन् प्रतिजानीते । छन्दसामिति ग्रन्थकृत् कथयति अह कालिदास नामा कवि. त श्रुतबोध सम्प्रवक्ष्यामि त क येन श्रुतमात्रेण छन्दसामनुष्टुबादीना असाधारणधर्म्म बुध्यते ज्ञायते ननु छन्दो ज्ञानाय छन्द कोशादयोऽनेके ग्रन्था. सन्ति किमपूर्वाऽऽरम्भेणानेन इत्याशङ्कानिरस्यति कथभूतं श्रुतबोध अविस्तर न विद्यते विस्तारो बाहुल्य यस्मिन् स अविस्तर तच्छन्द कोशादीना विस्तरत्वात् श्रुतमात्रेणाज्ञानात् लक्षण दृष्ट्वान्तयोः पृथगवस्थानात् तैर्बालाना छन्दोज्ञान दात् अत्र तु लक्षणदृष्टान्तयो स्व स्व पद एव निरूपणत्वात् श्रुतबोधत्व एतेनान्वियर्थसज्ञेयमिति सूचितम् ॥१॥

॥ श्रीराधादामोदरौ जयत. । श्रीराधाकृष्णाभ्यां नम ॥

॥ श्रीराम. ॥

Closing : ह्रस्वोवर्णा. स्यात्सप्तमो यत्र बाले ?
तद्वद्बिम्बोष्ठि न्यस्तएकादशाद्य. ।
वाणैर्विश्रामो यत्र चेद्वातुरङ्ग—
नाम्नि निर्दिष्टा सुभ्रु सा वैश्वदेवी ॥२४॥ श्रीः ॥

हे वाले! हे विम्वोष्ठि! बिम्वफलवत् ओष्ठौ यस्याः सा विम्वोष्ठी तत्सम्बुद्धौ सा नाम्ना वैश्वदेवी निर्दिष्टा कथिता। सा का यत्र हेसुभ्रु सुष्ठु भ्रुवौ यस्याः सा तत्सम्वुद्धौ, सप्तम वर्ण ह्रस्व. स्यात् तद्वत्तथैव एकादशाद्यो दशमो ह्रस्व. न्यस्त. स्यात्। यत्र बाणै. पञ्चाक्षरैः तुरङ्गैः सप्ताक्षरैर्वा विश्रामो भवति ॥२४॥

॥ श्रीराधागोविन्दाय नमः। श्रीदशरथात्मजाय नमः॥

934/28045 काव्यकौस्तुभ

Opening : दृष्टान्तेनाल्पवर्णेन महतोऽर्थस्य कीर्तनम्।

उदाहरणम्ः—

नृगवत्सर्गति याति यो ब्रह्म स्वापहारकः।

अत्र नृगवदित्यनेन नृगाख्यायिका व्यक्तिः।

पद्येन लघुना वास्या गम्भीरार्थप्रकाशनम्।

यथा—

निजभक्तसुखार्थं यः कालमप्यतिवर्त्तते।
पुरुषाय नमस्तस्मै कस्मैचित्पुरुषतेजसे ॥१॥

रावणेन निपीडितैः सुरैरभ्यर्थितो भगवान्।

द्वापरे एव तद्विनाशकालं त्रेतायां प्रकल्प्य तं विजघान। आदित्यादि तोशितश्च तत्सुखाय वलिवृद्धिकालमन्यथयन् वलिं दूषयामासेति। पद्यादस्मात्प्रकाशते।

अपारानन्दविज्ञप्तिर्यास्यान्न्यूनपदादिभिः।

यथा—

सस्मिता मृगशावाक्षी गाढमालिङ्गिता मया।
मा मा मेति यदब्रूत तन्मे कृन्तति मानसम् ॥१॥

Closing : केचन दोषाः सन्ति ते तूक्तेषु दोषेष्वन्तर्भवन्त्यतः पृथक् न लक्ष्यन्ते। तथाहि वैकल्यमप्रसिद्धिरित्ययोग्यता चानुप्रासस्य दोषः। स चानुप्रार्थत्वं प्रसिद्धिविरोध. प्रतिकूलाक्षरत्वं च। क्रमेणोदाहरणम्—

सुन्दरो नन्दपुत्रोऽसौ कंसस्त्वद्ध गनागन ।

अत्रानुप्रासो वाच्यपोषकत्वाद्विफल ।

वृन्दारकाणा सन्दोहः कुन्देन्दुप्रतिमो वभौ ।

अत्र सर्वेषां देवानां शौक्ल्यमप्रसिद्ध शिखण्डिताण्डवे भ माकामकाण्डेर्विखण्डिता अत्र शृङ्गारे गौडीरीतिरयुक्ता यमकस्य त्रिपाद्या स्थितिरप्रयुक्तता ।

यथा—

सारस तत्र पश्यन्ति सारसं नवयौवना ।
प्रेयसी श्रीहरौ सुभ्रू सरस प्रत्यपद्यत ॥१॥

उपमायामसादृश्यासम्भवावनुचितार्थता । क्रमेणोदाहरणम्—

हस. करीव निर्भाति विधुवत्पाण्डुरं वचः ।

अत्र मरालगजयोः सादृश्य नास्ति । वचसि शौक्ल्यमसम्भवि उपमानस्य जातिप्रमाणगते न्यूनत्वाधिक्ये च । तथा क्रमेणोदाहरणम् ।

विप्रोऽय सर्पवद्दीप्तो दधिविन्दुनिभो विधु. ।

अत्र जात्या प्रमाणेन च न्यूनता ।

दीर्घायुर्द्रोणिवत्काको वेणीय यमुनोपमा ।

अत्र जात्या प्रमाणेन चाधिक्यम् ।

नवप्रभ सम्प्रति काव्यकौस्तुभः,
प्रभाति विद्यैकविभूषणेन य ।
आलोकतस्तस्य जनैः सुबुद्धिभिः,
परीक्ष्यतामेष नु काव्यपूरुषः ॥

विद्याभूषणगदित गदित तत्र काव्यकौस्तुभ बिभ्रत् ।
तिष्ठति यदि कमनीयो मननीयोऽसौ न किं सदसि ॥१२॥

निखिलाङ्गसुन्दरोऽय नवरसभृत्काव्यकौस्तुभो ग्रन्थ ।
व्रजपतिसुताय सौख्यं सूर्य्याभिख्याय सदद्यात् ॥१३॥

Colophon : इति श्रीकाव्यकौस्तुभे शब्दार्थालङ्कारनिर्णये नवमी प्रभा समाप्ता ॥

समाप्तोऽयं काव्यकौस्तुभो ग्रन्थ । ग्रन्थमानं सार्द्धं सहस्रम् ।

रामाब्धिनागभूवर्षे तपस्ये मासि पक्षके ।
कृष्णे बुधे पञ्चम्यामलिखत्काव्यकौस्तुभम् ।।१।।

श्रीवल्लभकुलतिलका भक्ताः श्रीकृष्णचन्द्रस्य ।
दामोदरा वदान्या जीयासुश्चिरतरं जगति ।।२।।

पुत्रास्तेषां लालजिन्नामधेया विद्यावन्तो विद्भिरानन्दनीया ।
भूपैर्वन्द्या सद्गुणैः श्लाघनीया रूपैर्मुख्याः सज्जनैर्दर्शनीया ।३।

व्यासाः शुभकरणाख्या विख्याता भुवि गुणैः,
तेषां प्रमोदकृतये तदात्मजो हरिकरणनामेदम् ।
सोजिताख्ये पुरे चैव वसमानो द्विजालये,
सुखेन सद्गुरूणाञ्च प्रसादाच्छ्रीपते. सदा ।।४।। ।।कुलकम्।।

945/27820 रससिन्धु

Opening : गुणकीर्त्तनलक्षणम्

सौन्दर्यहसितालापैर्नास्त्यन्यस्तत्समो युवा ।
इति वाणी भवेद्यत्र तदित्थं गुणकीर्तनम् ।।

यद्वक्त्रं हसितेन्दुमण्डलमिदं स्फारं तदालोकितम्,
सा वाणी जितकामकार्मुकरवा सौन्दर्यमेतस्य तत् ।
इत्थं सन्ततमालिवल्लभतमव्यानुप्रसक्तात्मन-
श्वेतश्चुम्बितकालकूटमिव मे कस्मादिदं मुह्यति ।।

उद्वेगलक्षणम्,—

यस्मिन् रम्यमरम्यं स्यान्न च हर्षाय किञ्चन ।
प्रद्वेषं प्राणितव्येषु स उद्वेग स्मृतो यथा ।।

अग्न्यागारं कलयसि पुरश्चक्रवाकीव चन्द्रम् ।
बद्धोत्कम्प शिशिरमरुता दह्यते पद्मिनीव ।।

प्राणान् धत्से कथमपि बलाद् गच्छतः शल्यतुल्यान् ।
तत्केनासौ सुतनु जनितो मान्मथस्ते विकारः ।।

Closing : तत्र रतिभावाभासोदाहरणं यथा:—

वन्दीकृत्य नृपद्विषां मृगदृशस्ता. पश्यतां प्रेयसां,
श्लिष्यन्ति प्रणमन्ति लान्ति परितश्चुम्बन्ति ते सैनिका: ।
अस्माकं सुकृतैर्दृशोर्निपतितितोऽस्यौचित्यवारानिधे-
र्विध्वस्ता विपदोऽखिलास्तदितरै. प्रत्यर्थिभिस्तूयसे ।।६।।

अत्र राजविषयकरति: प्रत्यर्पिता बलात्कारकृतत्वादनुचितेति रति-भावाभासा: । यथा वा—

त्वयि लोचनगोचरं गते सफलं जन्म नृसिंहभूपते ।
अजनिष्ट ममेति सादर युधि विज्ञापयति द्विपां गण: ।।

एव देवादिविषयकरतिभावाभासोदाहरणानि ज्ञेयानि व्यभिचारि-भावाभासस्योदाहरणम् । यथा—

राकासुधाकरमुखी तरलायताक्षी,
सा स्मेरयौवनतरङ्गितविभ्रमास्या ।
तत्किं करोमि विदधे कथमत्र मैत्री,
तत्स्वीकृतिव्यतिकरे क इहाभ्युपाय: ।।

अत्र किं शब्देन जिज्ञासितवाचकेन चिन्ताख्यो व्यभिचारिभावो व्यज्यते। तस्याश्चागतिकत्वेन व्यर्थसद्भावाभासत्व एवमन्यान्यपि द्वात्रि-शदुदाहरणानि ज्ञेयानि ।

इति रसाभासभावाभासावुक्तौ ।।

इति श्रीमत्पौण्डरीकरामेश्वरकृते रससिन्धौ भावादिनिरूपण नाम चतुर्दशतम रत्नम् ।।

Closing : समाप्तोऽयं रससिन्धुनामा ग्रन्थ. ।।

Post-Colophonic : श्रावणमासे कृष्णपक्षे ७ चन्द्रवासरे संवत् १८६७
का. शा १७३२ प्रतिलिखितं ब्राह्मण मुरलीधर जैपुर ।।
मध्ये लिखायतं वैष्णव सुरतरामजी ।।

अन्वर्थनामा रससिन्धु एष, व्यधायि रामेश्वरपौण्डरीकै. ।

ग्रन्थो मनोज्ञो विलसन्ति यस्मादस्मिन्नूसमस्ता रसरीतयस्ता ।।
श्रीरामाय ।।

982/27460 वृत्तमाणिक्यमाला

Opening : ।। श्रीगणेशाय नमः ।।

श्रीमत्सिन्दूरपूरारुणतनुरतनुद्योतविद्योतिताशो,
दानाम्भः पानलुब्धा मधुकरपटलीगण्डपाली ददान ।।
चन्द्रीकुर्वन्नवकारानिव समुपगतौ मण्डलेश्चण्डरश्मे ,
प्रत्यूहव्यूहमुच्चैरपनयतु ममान्हाय वेतण्डतुण्ड. ।।१।।

ग्रन्था: सन्तीह रोगप्रकटनपटवोऽनेकशो दीर्घदीर्घा:,
कर्तुं तत्र श्रमं न प्रभुरिति नत एव साहाय्यमार ।
कण्ठे धातुं त्रिमल्लो रचयति हि निजे वृत्तमाणिक्यमाला,
नाम्ना ग्रन्थ क्षमध्व बुधभिषज ? इद चापल वो नमोऽस्तु ।।२।।

वात. पित्त कफश्च प्रकृतिसुसुखित कायमूलञ्च हस्तद्-
वैषम्य हीनमिथ्याधिकमभिजनक तस्य कालार्थकर्म ।
किञ्चित्तत्रापि वच्मि स्फुटमिह पवनादेर्विवृद्धे निमित्त
ह्लासस्याप्यस्य रूपाण्यपि भवति यतोऽह्नाय दोषप्रबोध. ।।३।।

Closing एषा श्रीमाधवोक्त क्रमत इह मया वृत्तमाणिक्यमाला,
छन्दोभिः स्कन्दवत्कुस्वरनयनमितै. स्रग्धराख्यैरवादि ।
एतज्जन्येन पुण्येन तु भवतु भव. श्रीभवान्याभिजुष्ट-
स्तुष्टस्त्रैलोक्यसर्गस्थितिलयघटन्व्यग्रहृदक्षकोणपात ।।२६२।।

Colophon : इति श्रीत्रिमल्लनिर्मिता वृत्तमाणिक्यमाला निदानदानरूप
समाप्ता ।

Post-Colophonic : सवत् १८९७ माघकृष्णा ९ शनिवासरायां ।

1001/28030 तिथिचूड़ामणि

Opening : ।। श्रीगणेशाय नम. ।।

प्रणम्य पुष्पदन्ताख्यौ शारदागणनायकम् ।
तिथिसिद्धिकामदुर्घां करोम्यज्यामतिस्फुटाम् ।।१।।

विघ्नेशं च गिरिं गुरु हरिहरब्रह्मार्कमुख्यान् ग्रहान्,
नत्वा चैव गुरोः पदाब्जयुगलप्राप्तः प्रसादः सुधीः ।
श्रीमद्भास्करकेशवादिरचितान्वीक्ष्य द्विचूडामणि,
शिष्यप्रार्थनया करोमि सुगमं तिथ्यादिशुद्धयै स्फुटम् ।। २।।

वर्तमानशक. यत्र स्थासन्तशकवर्जित: ।
तदङ्कोन्मितकोष्ठस्थ. फलं शाकफलान्वितम् ।।३।।

तिथिभयोगसंक्रान्ति ध्रुवा: केन्द्रसमन्विता: ।
भवन्ति चक्राभ्यधिकास्तेभ्यश्चक्राणि शोधयेत् ।।४।।

Closing : न्यस्ताधिकघटी निघ्नमन्तरं तेन युक् स्फुटं,
तेनोनितालभोग स्यात् सूक्ष्मार्कघटिकादिकम् ।।१७।।

आसीदुन्नतदुर्गनाम्नि नगरे श्रीवायुनाम्नौपितौ ?
ज्यौति शास्त्रविचारसारचतुरश्रीषोषनाख्यो द्विज: ।
तत्सूनुर्मतिमास्तु तेन रचित श्रीरामचन्द्रेण च,
वीक्ष्य सद्गणकै. सदा समुदितै. तिथ्यादिचूडामणि: ।।१८।।

Post-colophonic श्रीरामचन्द्रविरचिता चूडामणि. लिखिता विक्रमपुरे स० १८२० वर्षे ।

1002/27876 तिथिनिर्णय

Opening : ।। श्रीगणेशाय नम: ।।

प्रणम्य श्रीगणाधीश विघ्नविध्वसनक्षमम् ।
वालबोधाय सक्षेपात् क्रियते तिथिनिर्णय ।।११।।

तत्र वत्सरायनर्त्तुमासपक्षदिवसभेदात्काल षड्विध । तत्र मास-त्रैविध्येन वत्सरस्त्रिविध । तदुक्त ब्रह्मसिद्धान्ते-

चान्द्रसावनसौराणा मासानां तु प्रभेदतः ।
चान्द्रसावनसौराः स्युस्त्रय. संवत्सरा अपि ।।

तत्र चान्द्रः सम्वत्सरः चैत्रशुक्लप्रतिपदादिः फाल्गुनमासान्त ।
सौरस्तु मेषादिर्मीनान्त. सावनः षष्ट्युत्तरशतत्रयाहोरात्मकः—

Closing : फाल्गुने मासि पूर्णिमा आसाढ़े कार्तिके मासि चैत्रे ज्येष्ठे च पूर्णिमा मन्वादयः स्नानदानश्राद्धेष्वानन्त्यपुण्यदा ।।

Colophon : इति श्रीगोस्वामिशिवानन्दभट्टविरचितस्तिथिनिर्णय. सम्पूर्ण ।।१।।
रामार्पणमस्तु ।

Post-colophonic संं० १८३१ फाल्गुनशुक्लद्वादशी १२ चन्द्रे
व्यासश्रीकेशवात्मजभवानीशङ्करेण लिखितमद.
पुस्तकम् । श्रीः ।।

1004/27872 त्रिस्कन्धभूषण

Opening : ।। श्रीगणेशाय नमः ।।

यो निर्गुणो विश्वमिम तनोति
सत्त्वादिरूपैः सुरवन्दिताङ्घ्रिः ।
कालात्मकोऽप्यात्मविदां तमात्मा
देवाविदेवं द्युमणि नमामि ।।१।।

नूनं वहुभिराचार्यैः कृत प्रश्नविनिर्णय. ।
तद्वाक्यपरितोषार्थं वक्षे त्रिस्कन्दभूषणम् ।।२।।

लग्नेश्वरो भ्रूमिपतिर्निरुक्तो होरेश्वर कार्यपतिस्तथैव ।
दिनेश्वरस्तत्पुनरेवसाक्षी फलं नराणां त्रिभिरेभिरूह्यम् ।।३।।

Closing : अथ मृगया ज्ञानमाह—
होरेश्वरो रन्ध्रगत शुभो वा ह्याखेटकं तत्सफलं नृपाणाम् ।
पापोऽयवा लाभगतो न चाप्तिस्त्रिस्थो विनम्न्राच्चरमाच्चशोघ्रम् ।।४२।।

गुरूपदेशान्नृपते. सभायां करोति य· प्रश्नमिम हि विद्वान् ।
न तस्य वाक्यं प्रभवेदसत्य दिनेश्वरानुग्रहत कदाचित् ।।४३।।

Colophon : इति श्रीद्विवेदियुगराजविरचितं स्कन्धभूषणप्रश्नग्रन्थसमाप्तम् ।।

Post-colophonic सवत् १९११ रा मिति आश्विनशुक्लाष्टम्या शुक्रवासरे
लिषितं व्राह्मण उदीचरामनारायणशर्मणेन स्वार्थं ।
।। श्रीरस्तु ।।

1008/27523 नक्षत्रमालिका

Opening : ।। श्रीमते रामानुजाय नम· ।।

रम्यजामातुरार्यस्य चरणाम्बुरुहं भजे
शठारेर्यशलताशुद्धा चित्रा नक्षत्रमालिका ।।१।।

श्रीमान्मराकुशमुनिर्जीयाद्यद्ज्ञानमुद्रया ।
नेन्द्रियाश्वयुजो नृणां नित्यं विपयवीघय: ।।२।।

यदुरसि भरणीया स्रग्विकसितवकुलानद्धा ।
स जयति महिमानाथो मुररिपु. यदसक्तो न. ।।३।।

Closing : जन्मध्वंसं दिशतु जनाना वक्तुन्दोप्रोष्ठपदमनोज्ञम् ।
मन्दस्मेर मधुरकटाक्षं सुभ्रूरेकं सुभगकपोलम् ।।

लसति हि भजतां भद्रोत्तरपदकरणादूढम् ।
शठरिपुमुकुटं भासापरिहृतदुरितध्वान्तम् ।।

अन्तरेण शठरान्तिक. ससारेऽवतीहन ।
तदिद हृदये नित्यं निदधेऽन्तस्तद्वपुश्रियम् ?।।

वाचकी वरिवश्या मे तारकामालिकात्मिका ।
पराङ्कुशपराब्जेन परिष्कारवती भवेत् ।।

Colophon : इति श्रीनक्षत्रमालिका सम्पूर्णा ।।

1014/27505 भुवनदीपक

Opening : ।। श्रीगणेशाय नमः ।।

सारस्वत नमस्कृत्य महः सर्वतमोपहम् ।
ग्रहभावप्रकाशेन ज्ञानमुन्मील्यते मया ।।१।।

ग्रहाधिपा उच्चनीचा अन्योऽन्यं मित्रशत्रवः ।
राहुर्ग्रहोच्चनीचादि. केतुर्यत्रावतिष्ठति ।।२।।

स्वरूपं ग्रहचक्रस्य वीक्ष्य द्वादशवेश्मसु ।
निर्णयोऽभीष्टकालस्य यथालग्न विचार्यते ।।३।।

टीका—श्रीगणेशाय नमः ।

विश्वस्य भूषणं ज्ञानपोषण ध्वान्तदूषणं,
यूषं विभावरीरोगिप्राणिना नौमि पूषणम् ।
सुगमं सर्वैः ज्ञेयं यद्गूढं तज्जगदाधरेण मया,
प्रतिपदकथनैर्भुवनदीपकशास्त्रं बहिर्नेयम् ।।२।।

तत्र तावद्ग्रन्थारम्भे शिष्टाचारपरिपालनाय सकलान्तरायनिवारणाय च ग्रन्थकृत्स्वं(कृण्वन्)मङ्गलाचरणमाचरति । तदाशीर्नमस्क्रियावस्तुनिर्देशश्चेति त्रिविधम् । अत्र स्वाभीष्टदेवताप्रणतिपूर्वकं ग्रन्थसिद्धि प्रतिजानीते सारस्वतमिति । मया ग्रन्थकर्त्रा ग्रहभावप्रकाशेन ग्रहाणां सूर्यादीनां भावफलस्य प्रकाशेन प्रकटनेन, यद्वा ग्रहाणा भावाना राशीना प्रकाशेन फलकथनेन ज्ञान त्रैकालिकं उन्मील्यते दृष्टिगोचरीक्रियते । किं कृत्वा सरस्वत्या इद सारस्वत महस्तेजो नमस्कृत्य नत्वा, ननु वराहमिहिरज्योतिषाचार्यैः रविर्नमस्कृतः कथमनेन सारस्वत महो नमस्कृतमितिहेतुरुच्यते । तेषा मते रवेर्दर्शनेन नित्यनैमित्तिकादिर्वैदिकक्रिया. प्रवर्त्तन्ते । अतस्तु उदयेन तत्कृतशास्त्रस्य वेदाङ्गत्वात् त्रैवर्णिकैरेतच्छास्त्रमध्ययनीय अय तु क्षपणक, एतन्मते रविणा कृतेऽपि प्रकाशे हृत्स्थ तमो विनिवर्तते। ततः सारस्वतमहसा ज्ञानमुत्पद्यते । ततो मुक्तिः तदुक्तं—'ऋतेज्ञानान्नमुक्तिः' अत. सारस्वतमहो नमस्करणादिदं ज्ञायते यत्सर्वैः ज्ञातिभिर्ग्राह्योऽय ग्रन्थः ।

Closing : ग्रहभावप्रकाशाख्यं शास्त्रमेतत् प्रकाशितम् ।
जगद्भावप्रकाशाय श्रीपद्मप्रभसूरिभिः ॥६१॥

इति श्रीपद्मसूरिविरचित भुवनदीपक सम्पूर्णम् ।
॥ श्रीरस्तु कल्याणमस्तु ॥

टीका—इति
यथामति यथाधीतं शास्त्रं भुवनदीपकम् ।
गदाधरद्विजेनेद व्याख्यात स्वसुताय तत् ॥

Colophon : इति भुवनदीपकटीका समाप्तिमगात्

Post-Colophonic : स० १६०० मिती फा० शु० ८ चन्द्रवासरे लिखित
ओझा अमरचन्द्र छावणी नसीरावादमध्ये ।

1041/27138 जन्मसमुद्र

Opening : अथ जन्माम्भोधिः जन्मसमुद्रो नाम ग्रन्थ. समुल्लसेत् । कैरष्ट-कल्लोलै यः किं विशिष्टोऽनन्तयोगस्तासा निधि अनन्ता असख्या ये योगास्तेषा मध्ये रत्न तुल्या प्रधानो ये योगा गर्भसम्भवाद्यास्तेषा निधिर्निधान यो गम्भीरतावधिर्गम्भीरतायारवधि सीमा ...वहुलार्थत्वात् य सुधी वराभिगम्य सुष्ठु शोभना धीर्बुद्धिर्येषा ते सुधियो विद्वासस्तेषा मध्ये वराः प्रधाना लक्षणयुक्ता. सर्वज्योतिष्पु शास्त्रज्ञास्तैरभिगम्यो व्याख्येयस्तै. सेव्य इत्यर्थ. । अथ समुद्रपक्षेऽयमम्भोधि. समुद्र उल्लसेत् ।

Closing : श्रीमद्विक्रमवत्सरात्रिनयना घोषेत्र वर्षेत् यो,
मासे शुद्धचतुर्दशी शनि दिने चन्द्रावतीपत्तने
चैत्येकारि कुमारपालानृपतेर्वृत्तिर्वकाशा ...(भिद्या),
योधसस्याजरचन्द्रइन्द्र नृप मा पर्यायिरूपामिमाम् ॥

Colophon : इति श्रीकाश ..गच्छीयश्रीसिहस्ताच्छिष्य श्वेताम्बरश्रीनरचन्द्रोपाध्यायकृताया वृत्तिवेडासंज्ञाया जन्मसमुद्रप्रश्नशतसहोदराया जन्मसमुद्रवृत्ती ॥६॥

श्रीसिन्धुहठशूरारि शिष्टभाष्यकृति स्तुवे ।।२।।६।।
ग्रन्थाग्र १७३२ जन्मसमुद्रनामटीका ।।६।।६।।६।।

1063/26830 वर्षफलपद्धति

Opening :

आकर्ण्य गर्जितं यस्य विवस्त्रा कविदिग्गजा. ।
वितृव्य तन्निजं नत्वा गुरं श्रीमद्विहारिणम्. ।।१।।

नानाताजिकमालोक्य ..फलफलपद्धतिम् ।
कुर्वे दैवविदा तुष्ट्यैश्लोकसस्कृतसस्कृता ।।२।।

तत्र तावदस्य वर्षफलस्य लेखानुक्रमणिकेयं....शास्त्रप्रवीणनप्रशसाश्लोका: आशीर्वादश्लोका: लेख्या: । तत कलिसंवच्छकसंवत्सरसन्नयनऋतुमासपक्षतिथिवारनक्षत्रयोगकरणदिनमानरात्रिमानं तत्कालिकावर्चभुक्तांशतत्काललग्नाश होरादिभिर्वर्षसमयो लेख्य:, ततो ग्रहाणा स्वाभाविकग्रहकुण्डली च लेख्या, ततो दृष्टिचक्र च लेख्य, ततो सिद्धान्तोक्ता. सगतिकास्तात्कालिका ग्रहा लेख्या', ततस्तन्वाद्याद्वादशभावा. सधिसहिताऽद्य लेख्या', ततो राश्याद्या मुन्थापि लेख्या:, ततो भावकुण्डली च लेख्या, ततस्तन्वादिद्वादशभावफलानि विस्तरेण लेख्यानि, ततो द्वादशवर्गिकाचक्र तत्फलं च लेख्यं, ततो ग्रहाणा पञ्चवर्गीचक्रं लेख्य, तत. पञ्चवर्गबलानि लेख्यानि, तत. पञ्चाधिकारणोलेख्य', तत. वर्षेसो लेख्य., ततो वर्षेसफलञ्च लेख्य., तज्जन्मसमयो लेख्य , तत्र मुन्थापि लेख्या , ततो मुन्थाफलञ्च लेख्यं, तत इष्टाशालादियोगचतुष्टयफलानि च लेख्यानि,ततोऽरिष्टानि लेख्यानि,ततोऽरिष्टभङ्गोऽपि लेख्य , तत' हृरिस्थानानि लेख्यानि, ततो सहमानि लेख्यानि ततो सहमकुण्डली च लेख्या, ततो ग्रहाणा दशानयनार्थं हीनाशापात्यंशाश्च लेख्या , ततो ग्रहाणा लग्नस्य च महादशालेख्या । ततो द्वादशाना योगाश्च लेख्या , ततो दशाफलानि लेख्यानि, तन्मध्येभावफलानि च लेख्यानि, तन्मध्येस हमोदभावफलानि लेख्यानि, ततस्तन्मध्येऽन्तर्दशाचक्र च लेख्य, ततस्तन्मध्ये ग्रहाणामन्तर्दशा च फलानि लेख्यानि, ततो मासवेशसमयो लेख्य , ततो मासवेशस्वाभाविकग्रह-